।।ॐ श्रीपरमात्मने नमः।।

Sem-V, Sec-A, U-III

# सांमनस्यसूक्तम्

(अथर्ववेदः ३यः काण्डः, *६ष्ठः अनुवाकः*, ३० सूक्तम्)

(ऋषिः अथर्वा। देवता – चन्द्रमाः)

अनु॑व्रतः पि॒तुः पु॒त्रो मा॒त्रा भ॑वतु॒ संम॑नाः।

जा॒या पत्ये॒ मधु॑मतीं॒ वाचं॑ वदतु॒ शन्ति॒वाम्।।२।।

**अन्वयसहितवङ्गानुवादः** – पुत्रः (পুত্র) पितुः (পিতার) अनुव्रतः [भवतु] (অনুকূল হোক বা কর্ম করুক) मात्रा [सह] (মায়ের সাথে) संमनाः (সমানমনস্ক বা উত্তম মনস্ক) भवतु (হোক) जाया (পত্নী) पत्ये (পতির উদ্দেশ্যে) मधुमतीम् (মধুর) शन्तिवाम् (শান্তিপূর্ণ) वाचम् (বাক্য) वदतु (বলুক/বলবে)।

मा भ्राता॒ भ्रात॑रं द्वि॒क्षन्मा स्वसा॑रमु॒त स्वसा॑।

स॒म्य॒ञ्चः॒ सव्र॑ता भू॒त्वा वाचं॑ वदत भ॒द्रया॑।।३।।

**अन्वयसहितवङ्गानुवादः** – भ्राता (ভাই) भ्रातरम् [प्रति] (ভাইয়ের প্রতি) मा द्विक्षत् (দ্বেষ না করে) उत (আর) स्वसा (বোন) स्वसारम् [प्रति] (বোনের প্রতি) मा [द्विक्षत्], (দ্বেষ না করে) सम्यञ्चः (তারা সকলে (সমানগতি) सव्रताः (সমানকর্মা) भूत्वा (হয়ে) भद्रया (কল্যাণকর) वाचम् (বাক্য) वदत (বলুক)।

धर्मो रक्षति रक्षितः

येनं देवा न वियन्ति नो चं विद्विषते मिथः।

तत्कृंण्मो ब्रह्मं वो गृहे संज्ञानं पुरुंषेभ्यः।।४।।

**अन्वयसहितवङ्गानुवादः** – येन [ब्रह्मणा] (যে মন্ত্রের দ্বারা) देवाः (দেবতারা) न वियन्ति (বিমত প্রাপ্ত হয় না) च (এবং) नो मिथः विद्विषते (পরস্পরের প্রতি বিদ্বেষ করে না) तत् (সেই) संज्ञानं (সমানজ্ঞানযুক্ত) ब्रह्म (মন্ত্র) वः (তোমাদের) गृहे (গৃহে) पुरुषेभ्यः (পুরুষদের উদ্দেশ্যে অর্থাৎ গৃহস্থিতমানুষদের উদ্দেশ্যে) कृण्मः (করছি)।

**व्याख्या** – प्रथममन्त्रे ऐक्यस्थापनाय यः आदेशः प्रकीर्तितः ऋषिभिः तस्य आचरणविधिः उक्ते त्रिविधे मन्त्रे कृतः। गृहस्थानां कृते तस्य आचरणस्य पालनेन पूर्वोक्तः सहृदयादिः सदा जगरितः भवेदिति आशयः। तद्यथा पुत्रः जनकस्य अनुकूलं कार्यं कुर्यात्। एवञ्च मात्रा सह पुत्रस्य व्यवहारोऽपि उत्तमभावनाभिः युक्तः भवेत्। अस्या विपरीतमपि अर्थात् कन्यापि पितृमात्रनुकूलं भवेदित्याशयः। पत्युः समीपे पत्नी सदा मधुरानि वक्यानि वदेत् तथा पतिः अपि स्वपत्नीं निकषा सुखकरं भवेत्। भ्रातरं प्रति भ्राता पुनः भगिनीं प्रति भगिनी च कदापि द्वेषः न कुर्यात्। तन्नाम अस्य विपरीतमपि बोद्धव्यम् अर्थात् भ्राता भगिनीं प्रति भगिनी भ्रातरं प्रति अपि उक्तः व्यवहारः कुर्यात्। सदा ते मिलित्वा कल्याणप्रदायकानि वाक्यानि वदेयुः। यतो हि अस्माकं मध्येऽपि स मन्त्रः विद्यते नाम वयमपि तस्य ज्ञानस्य आधारः येन देवाः परस्परं मिलित्वा विद्वेषादिं न कृत्वापि च तिष्ठन्ति। तत् ज्ञानं योजयित्वा हि परब्रह्मणा आस्माकम् इहलोके प्रेरितम् इति।